भरणीभूः, पुं, (भरणी भूरुत्पत्तिस्थानं यस्य।) राहुग्रहः। इति हेमचन्द्रः॥

भरणीयः, त्रि, भरणयोग्यः। पोष्यः। भृधातोः कर्म्मणि अनीयप्रत्ययेन निष्पन्नः॥ (यथा, महाभारते। ५।१५०।१७।
"सर्व्वे भवन्तु ते राज्यं पञ्च ग्रामान् विसर्ज्जय।
अवश्यं भरणीया हि पितुस्ते राजसत्तम!॥")

भरण्डः, पुं, (बिभर्त्तीति। भृ+"अण्डन्कृसृभृवृञः।" उणा०।१।१२८। इति अण्डन्।) स्वामी। भूपालः। वृषः। इत्युणादिकोषः॥ भूः। कृमिः। इति संक्षिप्तसारोणादिवृत्तिः॥

भरण्यं, क्ली, (भरणे साधु।"तत्र साधुः।"४।४।९८। इति यत्।) मूल्यम्। वेतनम्। इत्यमरः।२।१०।३९॥

भरण्यभुक्, त्रि, (भरण्यं वेतनं भुनक्ति इति। भुज्+क्विप्।) कर्म्मकरः। मूल्यं गृहीत्वा कर्म्मकारकः। इत्यमरः।३।१।१६॥

भरण्या, स्त्री, (भरण्य+अजादित्वात् टाप्।) वेतनम्। इत्यमरटीकायां स्वामी॥

भरण्याह्वा, स्त्री, (भरण्या आह्वा आख्या यस्याः।) पर्व्वपुष्पी। इति शब्दचन्द्रिका॥ रामदूतीति ख्याता॥

भरण्युः, पुं, (कण्ड्वादिगणीयभरण्यधातुः। ततो बाहुलकात् उः।) शरण्युः। मित्रम्। इति शब्दमाला॥ अग्निः। चन्द्रमाः। ईश्वरः। इति संक्षिप्तसारोणादिवृत्तिः॥

भरतः, पुं, (बिभर्त्ति स्वाङ्गमिति। बिभर्त्ति लोकानिति वा। भृ+"भृमृदृशियजीति।" उणा० ३।११०। इति अतच्।) नाट्यशास्त्रम्। मुनिविशेषः। स तु अलङ्कारादिशास्त्रस्य सूत्रकर्त्ता। (भरतस्य शिष्यः। तस्येदमित्यण्। अणो लुक्।) नटः। रामानुजः। दौष्मन्तिः। इति मेदिनी। ते, १३७-३८॥ शबरः। तन्तुवायः। इति विश्वः॥ क्षेत्रम्। भरतात्मजः। इति हेमचन्द्रः॥ दुष्मन्तराजपुत्त्रभरतस्य पर्य्यायः। शाकुन्तलेयः २ दौष्मन्तिः ३ सर्व्वदमनः ४। इति त्रिकाण्डशेषः॥ यस्त्रयस्त्रिंशच्छतमश्वमेधं कृतवान्। पञ्चाशद्राजसूयं एवमन्यान् नानाविधान् यज्ञानकरोत्। सप्तविंशतिसहस्रवत्सरानेकच्छत्रं राज्यं कृतवान्। तस्योत्पत्त्यादिर्य्यथा,—
"दुष्मन्तो मृगयां यातः कण्वाश्रमपदं गतः।
तत्रासीनां स्वप्रभया मण्डयन्तीं रमामिव॥
विलोक्य सद्यो मुमुहे देवमायामिव स्त्रियम्।
बभाषे तां वरारोहां भटैः कतिपयैर्वृतः॥
तद्दर्शनप्रमुदितः संनिवृत्तपरिश्रमः।
पप्रच्छ कामसन्तप्तः प्रहसन् श्लक्ष्णया गिरा॥
का त्वं कमलपत्राक्षि! कस्यासि हृदयङ्गमे!।
किं स्विच्चिकीर्षितं तत्र भवत्या निर्ज्जने वने॥
व्यक्तं राजन्यतनयां वेद्म्यहं त्वां सुमध्यमे!।
न हि चेतः पौरवाणामधर्म्मे रमते क्वचित्॥

शकुन्तलोवाच।
विश्वामित्रात्मजैवाहं त्यक्ता मेनकया वने।
वेदैतद्भगवान् कण्वो वीर! किं करवाम ते॥
आस्यतां ह्यरविन्दाक्ष! गृह्यतामर्हणञ्च नः।
भुज्यतां सन्ति नीवारा उष्यतां यदि रोचते॥

श्रीदुष्मन्त उवाच।
उपपन्नमिदं सुभ्रु! जातायाः कुशिकान्वये।
स्वयं हि वृणुते राज्ञां कन्यका सदृशं वरम्॥
ओमित्युक्ते यथाधर्म्ममुपयेमे शकुन्तलाम्।
गान्धर्व्वविधिना राजा देशकालविधानवित्॥
अमोघवीर्य्यो राजर्षिर्महिष्यां वीर्य्यमादधे।
श्वोभूते स्वपुरं यातः कालेनासूत सा सुतम्॥
कण्वः कुमारस्य वने चक्रे समुचिताः क्रियाः।
बद्ध्वा मृगेन्द्रं तरसा क्रीड़ति स्म स बालकः॥
तं दुरत्ययविक्रान्तमादाय प्रमदोत्तमा।
हरेरंशांशसम्भूतं भर्त्तुरन्तिकमागमत्॥
यदा न जगृहे राजा भार्य्यापुत्त्रावनिन्दितौ।
शृण्वतां सर्व्वभूतानां खे वागाहाशरीरिणी॥
माता भस्त्रा पितुः पुत्त्रो येन जातः स एव सः।
भरस्व पुत्त्रं दुष्मन्त! मावमंस्थाः शकुन्तलाम्॥
रेतोधाः पुत्त्रो नयति नरदेव! यमक्षयात्।
त्वञ्चास्य धाता गर्भस्य सत्यमाह शकुन्तला॥
पितर्य्युपरते सोऽपि चक्रवर्त्ती महायशाः।
महिमा गीयते तस्य हरेरंशभुवो भुवि॥
चक्रं दक्षिणहस्तेऽस्य पद्मकोशोऽस्य पादयोः।
ईजे महाभिषेकेण सोऽभिषिक्तोऽधिराड्विभुः॥
पञ्चपञ्चाशता मेध्यैर्गङ्गायामनु वाजिभिः।
मामतेयं पुरोधाय यमुनामनु च प्रभुः॥
अष्टसप्ततिमेध्याश्वान् बबन्ध प्रददद्वसु।
भरतस्य हि दौष्मन्तेरग्निः साचीगुणे चितः॥
सहस्रं बद्वशो यस्मिन् ब्राह्मणा गा विभेजिरे।
त्रयस्त्रिंशच्छतं ह्यश्वान् बद्ध्वा विस्मापयन् नृपान्॥
दौष्मन्तिरत्यगान्मायां देवानां गुरुमाययौ।
मृगान् शुक्लदतः कृष्णान् हिरण्येन परीवृतान्॥
अदात् कर्म्मणि मष्णारे नियुतानि चतुर्द्दश।
भरतस्य महत् कर्म्म न पूर्व्वे नापरे नृपाः॥
नैवापुर्नैव प्राप्स्यन्ति बाहुभ्यां त्रिदिवं यथा।
किरातहूणान् यवनान् पौण्ड्रान् कङ्कान् खशाञ्छकान्॥
अब्रह्मण्यनृपांश्चाहन् म्लेच्छान् दिग्विजयेऽखिलान्।
जित्वा पुरासुरा देवान् ये रसौकांसि भेजिरे॥
देवस्त्रियो रसां नीताः प्राणिभिः पुनराहरत्।
सर्व्वान् कामान् दुदुहतुः प्रजानां तस्य रोदसी॥
समास्त्रिणवसाहस्रीर्दिक्षु चक्रमवर्त्तयत्।
स सम्राट् लोकपालाख्यमैश्वर्य्यमधिराट्श्रियम्॥
चक्रञ्चास्खलितं प्राणान्मृषेत्युपरराम ह।
तस्यासन् नृप! वैदर्भ्यः पत्न्यस्तिस्रः सुसम्मताः॥
जघ्नुस्त्यागभयात् पुत्त्रान्नानुरूपा इतीरिते॥"
इति श्रीभागवते ९ स्कन्धे २० अध्यायः॥*॥ ऋषभदेवात् इन्द्रदत्तजयन्त्यां कन्यायां जातशतपुत्त्राणामग्रतज्येष्ठपुत्त्रः। यथा। "अथ ह भगवान् ऋषभदेवः स्वं वर्षं कर्म्मक्षेत्रमनुमन्यमानः प्रदर्शितगुरुकुलवासो लब्धवरैर्गुरुभिरनुज्ञातो गृहमेधिनां धर्म्माननुशिक्षमाणो जयन्त्यामिन्द्रदत्तायामुभयविधं कर्म्म समाम्नायमभियुञ्जन्नात्मजानामात्मसमानानां शतं जनयामास। येषां खलु महायोगी भरतो ज्येष्ठः श्रेष्ठगुण आसीत् येनेदं वर्षं भारतमिति व्यपदिशन्ति।" इति श्रीभागवते ५ स्कन्धे ४ अध्यायः॥*॥ पावकपुत्त्रः। यथा,—
"पावनो लौकिको ह्यग्निः प्रथमो ब्रह्मणः सुतः।
ब्रह्मौदनाग्निस्तत्पुत्त्रो भरतो नाम विश्रुतः॥"
इति मात्स्ये अग्निवंशो नाम ४८ अध्यायः॥
रामानुजभरतस्य जन्म यथा,—
"भरतो नाम कैकेय्यां जज्ञे सत्यपराक्रमः।
साक्षाद्विष्णोश्चतुर्भागः सर्व्वैः समुदितो गुणैः॥"
तस्यानुगतः शत्रुघ्नः। यथा,—
"भरतस्यापि शत्रुघ्नो लक्ष्मणावरजो हि सः।
प्राणैः प्रियतरो नित्यं तस्य चासीत्तथा प्रियः॥"
स कुशध्वजकन्यां माण्डवीं परिणीतवान्। यथा,
"भ्राता यवीयान् धर्म्मज्ञ एष राजा कुशध्वजः।
अस्य धर्म्मात्मनो राजन्! रूपेणाप्रतिमं भुवि॥
सुताद्वयं नरश्रेष्ठ! पत्न्यर्थं वरयामहे।
तमेवमुक्त्वा जनको भरतञ्चाभ्यभाषत॥
गृहाण पाणिं माण्डव्याः पाणिना रघुनन्दन!॥"
स नन्दिग्रामे राज्यं कृतवान्। यथा,—
"सवल्कलजटाधारी मुनिवेशधरः प्रभुः।
नन्दिग्रामेऽवसद्वीरः ससैन्यो भरतस्तदा॥
सबालव्यजनं छत्रं धारयामास स स्वयम्।
भरतः शासनं सर्व्वं पादुकाभ्यां निवेदयन्॥
ततस्तु भरतः श्रीमानभिषिच्यार्य्यपादुके।
तदधीनस्तदा राज्यं कारयामास सर्व्वदा॥"
इति रामायणे बालकाण्डे। १८। ७२। ७३ अध्यायाः। अयोध्याकाण्डे २४ अध्यायश्च॥
तस्य द्वौ पुत्त्रौ। यथा,—
"भरतस्यात्मजौ वीरौ तक्षः पुष्कल एव च।
मातुलेन सुगुप्तौ तु धर्म्मेण सुसमाहितौ॥
भरतश्चाग्रतः कृत्वा कुमारौ सबलानुगौ।
निहत्य गन्धर्व्वसुतान् द्वे पुरे वि[illegible]ष्यतः॥"
इति रामायणे उत्तरकाण्डे १०१ अध्यायः॥

भरतखण्डं, क्ली, भारतवर्षान्तर्गतकुमारिकाखण्डम्। यथा,—
"कुमारिकेति विख्याता यस्या नाम्ना प्रकथ्यते।
इदं कुमारिकाखण्डं चतुर्व्वर्गफलप्रदम्॥
यथा कृतवनीयश्च नानाग्रामादिकल्पना।
इदं भरतखण्डञ्च यथा सम्यक् प्रकल्पितम्॥"
इति स्कान्दे कुमारिकाखण्डे भूसंस्थितिनामाध्यायः॥

भरतपुत्त्रकः, पुं, (भरतस्य नाट्यशास्त्रप्रणेतुः पुत्त्रकः।) नटः। इति हेमचन्द्रः॥

भरतप्रसूः, स्त्री, (प्रसूते इति। प्र+सू+क्विप्। प्रसूः। भरतस्य प्रसूः।) कैकेयी। इति शब्दरत्नावली॥